**क्रोडपाद** पुंस्त्री क्रोडे पादोऽस्य। कच्छपे हेम० क्रोडाङ्घ्रि प्रभृतयोऽप्यत्र।

**क्रोडादि** पु० पाणिन्युक्ते उपसर्जनस्वाङ्गे ङीष्निषेध निमित्ते शब्दगणे स च गणः "क्रोड नख खुर शाखा उखा शिखा बाल शफ शूक" क्रोडादिराकृतिगणः तेन भग गल घोण इत्यादयोऽपि ग्राह्याः

**क्रोडी** स्त्री क्रोड+जातौ, गौरा०वा ङीष्। १वराहजातिस्त्रियां २वाराहीकन्दे च राजनि०।

**क्रोडीकरण** न०क्रोड+च्वि+कृ–भावे ल्युट्। आलिङ्गने हला०

**क्रोडीमुख** पुंस्त्री क्रोड्याः शूकर्य्यामुखमिव मुखमस्य। गण्डके (गाण्डार) राजनि० स्त्रियां जातित्वात् ङीष्।

**क्रोडेष्टा** स्त्री क्रोडस्य इष्टा प्रिया। मुस्तके (मुथा) राजनि०

**क्रोथ** पु० क्रुथ–हिंसने भावे घञ्। हनने हेमच०

**क्रोध** पु०क्रुध-भावे घञ्। १परापकाराय चित्तवृत्तिभेदे, परानिष्टाभिलाषेण अनिष्टविषयद्वेषहेतुके चित्तवृत्तिभेदे। क्रोधश्च रौद्ररसस्य स्थायिभावः"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः"सा० द०"क मएव कुतश्चित् प्रतिहतः क्रोधरूपेण परिणमते स च रजोगुणकार्य्यः"कामएष क्रोधएष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्"गीतोक्तेः"यस्त्वया पृष्टोहेतुरेष काम एव। ननु क्रोधोऽपि पूर्वं त्वयोक्तः"इन्द्रियस्येन्द्रियस्यार्थे"इत्यत्र, सत्यं नासौ ततः पृथक् किन्तु क्रोधोऽप्येषएव, कामएव हि केनचित् प्रतिहतः क्रोधात्मना परिणमते। पूर्व्वं पृथगुक्तोनोक्तोऽपि क्रोधः कामज एवेत्यभिप्रायेणैकीकृत्योच्यते रजोगुणात् समुद्भवतीति तथा" श्रीधरः। तस्य कामजत्वमपि "सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते"गीतायामुक्तम्। तत्कार्य्याणि उक्तानि"न कस्य क्रोधान्धः प्रभवति विघातं रणकृते""अन्धीकरोति भुवनं बधिरीकरोति धीरं सचेतनमचेतनतां नयेत् क्रुत्। क्रुध्यं न पश्यति नचात्महितं शृणोति धीमानधीतमपि न प्रतिसन्दधाति" नीतिशा०"क्षमैव क्रोधविजये समर्थेति विवेकिनः। क्रोधः कार्य्यविभङ्गाय तस्मात्तं क्षमया जयेत्" शकुनशा०स च सदुमध्याधिमात्रभेदेन त्रिधेति पा० साधन पादे ३४सू० भा० स्थितम् "क्रोधं विभो! संहर संहरेति" कुमा०। "क्रोधे चलगणः शरे दशमुखः पाणौ प्रलम्बासुरः" सा० द०। "क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्" वेणी०। "विषमस्थं जगत्सर्व्वं व्याकुलं समुद्धृतम्। जनानां जायते भद्रे! क्रोधे क्रोधः पर-



स्वरम्" इत्युक्तलक्षणे षष्टिवर्षान्तर्गते अष्टत्रिंशत्तमे २वर्षभेदे पु०।

**क्रोधकृत्** त्रि०क्रोधं करोति कृ–क्विप्। क्रोधकारिणि २परमेश्वरे पु० "क्रोधहा क्रोधकृत् कर्त्ता विश्वबाहुर्महीधरः" विष्णुसं० असाधून् प्रति क्रोधकर्तृत्वात् तस्य तथात्वम्"श्रुति स्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी नरके प्रनिवर्त्तते" इति श्रुतिस्मृत्युदितकर्म्मानाचरणे ईश्वरद्विष्टत्वोक्तेः तस्य तादृशान् प्रति क्रोधकर्तृत्वम्। तच्च प्राणिनां स्वादृष्टविशेषात् भवति

**क्रोधज** त्रि० क्रोधात् जायते जन–ड ५त०। १क्रोधजाते २मोहे पु० मोहस्य क्रोधजत्वं गीतायामुक्तं यथा "क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः" क्रोधजाते द्विविधव्यसनान्तर्गते व्यसनाष्टके च यथाह मनुः "पैशुन्यं साहसं द्रोहईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः"

**क्रोधन** क्रुध–युच्। १क्रोधशीले अमरः "यद्रागेण कृतं तदेव कुरुते द्वैपायनिः क्रोधनः" वेणी० "वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च। स्वसृमः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा। कौशिकस्य सुता आसन् शिष्याः गर्गस्य भारत!" हरि० २१२ अ० उक्ते गर्गशिष्ये २कौशिकपुत्रभेदे।"रोगोत्करणदुर्भिक्षं विरोधोत्तरसङ्कुलम्। क्रोधने विषमं सर्वं समाख्यातं हरप्रिये!" इत्युक्तलक्षणे षष्टिसंवत्सरान्तर्गते ऊनषष्टितमे ३वर्षभेदे। "कपिताङ्गारसदृशश्च उलूमत्तःक्रोधनस्तथा।" इति तन्त्रोक्ते ४भैरवभेदे च पु०।

**क्रोधमूर्च्छित** त्रि० क्रोधेमूर्च्छितो बद्धलीभूतोऽस्य ३त० वा। १अतिकोपने "एवमुक्ता तु पार्थेन उर्व्वशी क्रोधमूर्च्छिता" भा०व० ४६अ० ५त०। २चोरनामगन्धद्रव्ये पु० शब्दर०

**क्रोधवर्द्धन** त्रि० क्रोधं वर्द्धयति वृध–णिच् ल्यु ६त०। १कोपस्य वर्द्धके अनिष्टसूचकवाक्यादौ २असुरभेदे पु० "चन्द्रहन्ता क्रोधहन्ता क्रोधवर्द्धन एव च" हरि० २६३अ० असुरकथने। स एव भारतयुद्धकाले दण्डधारत्वपत्वेनाविर्भूतः यथा "क्रोधवर्द्धन इत्येव यस्त्वन्यः परिकीर्त्तितः। दण्डधारइति ख्यातः सोऽभवन्मनुजर्षभः" भा० आ०६७अ० अंशावतारे

**क्रोधहन्** पु० क्रोधं हन्ति हन्–क्विप्। १विष्णौ "क्रोधहा क्रोधकृत् कर्ता विश्वबाहुर्महीधरः" विष्णुसं० "साधूनां क्रोधं हन्तीति क्रोधहा" भा०। २कोपघातके त्रि०

**क्रोधहन्त** त्रि० क्रोधं हन्ति हन–झच् ६त०। १कोपघातके